# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| कक्षा – शास्त्री-3 | प्रश्नपत्रम् – 7 | गुणाः – ५० |
| विषयः – स्वामिनारायणवेदान्तः (J) | सत्रम् – 6 | समयः – १० तः १२ |
| दिनाङ्कः – २०/०७/२०२१ | सन्दर्भग्रन्थः – सत्सङ्गिजीवनम् (वटपत्तनशास्त्रार्थः) | |

**सूचना - निम्नलिखितेषु दशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः ।**
**प्रत्येकं प्रश्नस्य समानगुणाः । (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः पद्ययोः यथाग्रन्थं व्याख्या कार्या ।**

१ मुमुक्षवो हि पञ्चैते स्निग्धाश्चाऽऽसन् परस्परम् ।
बहुशास्त्रश्रुतेर्नापुः स्वोपास्यैकेशनिश्चयम् ॥
२ कृते यद्ध्यायतो विष्णुं त्रेतायां यजतो मखैः ।
द्वापरे परिचर्यायां कलौ तद्धरिकीर्तनात् ॥
३ पौराणिकाः शास्त्रिणश्च बहवो वैष्णवास्तथा ।
तत्राजग्मुः शाम्भवाश्च प्रेक्षकाश्चेतरे जनाः ॥

**प्रश्नः २ रामचन्द्रादिभिः मुमुक्षुभिः हरिहराचार्यं किं पृष्टम् ? तेन किमुत्तरं दत्तम् ? इत्युपवर्णयत ।**

**प्रश्नः ३ पञ्चाध्यायेषु विभक्तस्य वटपत्तनशास्त्रार्थस्य प्रथमाध्यायस्य सारांशमुपवर्णयत ।**

**प्रश्नः ४ कयोश्चिद् द्वयोः पद्ययोः व्याख्यात्मकमुत्तरं प्रदेयम् ।**

१ भारतं पञ्चमो वेदस्तत्र भागवते तथा ।
नरनारायणस्यास्ति कथा कृष्णार्जुनाकृतेः ॥
२ प्रमाणेभ्यो हि सर्वेभ्यः प्रत्यक्षं बलवत्तरम् ।
अनुमानादिभिस्तस्य बाधः कर्तुं न शक्यते ॥
३ अज्ञत्वं पारवश्यत्वं विधिभेदादिकं तथा ।
तथा प्राकृतदेहत्वं देहत्यागादिकं तथा ॥

**प्रश्नः ५ षट्त्रिंशदध्यायस्य सारभागं यथाग्रन्थमुपवर्णयत ।**

**प्रश्नः ६ केवलं भगवन्नामोच्चारणेन मुक्तिः भवति न वा ? इति विस्तरेण निरूपयत ।**

**प्रश्नः ७ कयोश्चिद् द्वयोः श्लोकयोः यथाग्रन्थं व्याख्या कार्या ।**

१ प्रादुर्भावसहस्राणि अतीतानि न संशयः ।
भूयश्चैव भविष्यन्तीत्येवमाह प्रजापतिः ॥

२ दशसङ्ख्याभ्रमं त्यक्त्वा ततः स्वस्थेन चेतसा ।
कृतावतारो भगवान् श्रयणीयो मुमुक्षुणा ॥

३ सिताम्बरं घनश्यामं वर्णिवेषं मनोहरम् ।
तं ध्यायथेति तेनोक्तास्तेऽपि तत्र तथाऽऽचरन् ॥

**प्रश्नः ८ भगवदवताराणाम् असङ्ख्यत्वं सप्तत्रिंशदध्यायानुसारमुपपादनं कुरुत ।**

**प्रश्नः ९ अष्टात्रिंशदध्यायस्य सारांशं ग्रन्थोक्तदिशा विवृणुत ।**

**प्रश्नः १० दशानां एकवाक्येन उत्तरं लिखत ।**

१ श्रीमत्सत्सङ्गिजीवनग्रन्थरत्नस्य कर्ता कः ?
२ श्रीमत्सत्सङ्गिजीवनस्य चतुर्थप्रकरणे शास्त्रार्थस्य कति अध्यायाः सन्ति ?
३ चतुस्त्रिंशदध्याये कति श्लोकाः सन्ति ?
४ मुक्तानन्दः स्वामी केन वटपत्तनं प्रेषितः ?
५ 'बहुवित्तमम्' इति शब्दस्यार्थं लिखत ।
६ कलौ भगवदवताराः भवन्ति न वा ?
७ नाथजिद्भक्तस्य गृहे कः समागतः ?
८ रामचन्द्रादिभिः वादिभिः स्वमनसि किं निश्चितम् ?
९ 'अंहसाम्' इति पदस्य कोऽर्थः ?
१० षट्त्रिंशदध्याये कति श्लोकाः सन्ति ?
११ युगशब्दः कस्य वाचकः ?
१२ आसुरीं योनिमापन्नाः मूढाः कां गतिं यान्ति ?
१३ सत्त्वनिधेः हरेः कति अवताराः सन्ति ?
१४ सप्तत्रिंशदध्याये भगवदवतारविषयकः प्रश्नः केन पृष्टः ?
१५ 'उत्कान्' इति शब्दस्य कोऽर्थः ?

****